लक्ष्यं विश्वमानम्

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 2nd Semester Examination, 2023

DINABANDHU MAHAVIDYALAYA Estd.-1947 CENTRAL LIBRARY

## SANACOR03T-SANSKRIT (CC3)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. यथाभिमतं ***कस्यचिदेकस्य*** प्रश्नस्योत्तरं प्रदेयम्। 10×1 = 10

(क) को नाम चन्द्रापीडः ? मदजल-दुर्दिनान्धकार-गज-घन-घटा परिपालितापि प्रपलायते — सन्दर्भेऽस्मिन् कस्याः पलायनम् उल्लिखितम् ? शुकनासोपदेशमनुसृत्य तस्याः चरित्रं निरूप्यताम्। 1+1+8

(ख) बाणभट्टस्य काव्यप्रतिभां रचनाशैलीं चावलम्ब्य संक्षेपेण आलोचनं क्रियताम्। 10

2. अधोलिखितेषु यथेच्छं ***त्रयं*** संस्कृतभाषया देवनागरलिप्या च व्याख्येयम् — 5×3 = 15

(क) कुसुमशरप्रहारजर्जरिते हि हृदये जलमिव गलत्युपदिष्टम्।

(ख) चन्दनप्रभवो न दहति किमनलः ? किंवा प्रशमनहेतुनापि न प्रचण्डतरीभवति वडवानलो वारिणा ?

(ग) मनसा देवताध्यारोपणप्रतारणासम्भूत-सम्भावनोपहताश्च अन्तःप्रविष्टापरभूजद्वयमिवात्मबाहुयुगलं सम्भावयन्ति।

(घ) इन्द्रियहरिणहारिणी च सततमतिदुरन्तेयमुपभोगमृगतृष्णिका।

(ङ) 'आरूढ़प्रतापो हि राजा त्रैलोक्यदर्शीव सिद्धादेशो भवति' इत्येतावदभिधायोपशशाम।

अथवा

अधोनिर्दिष्टं ***विषयत्रयमाश्रित्य*** संस्कृतभाषया देवनागरलिप्या च टीकां लिखत — 5×3 = 15

(क) तिमिरान्धत्वम् ; (ख) गन्धर्वनगरलेखा ; (ग) कुसुमशरः ; (घ) मृगतृष्णिका ; (ङ) अमृतसहोदरा।

### SECTION-B

3. अधोलिखितयोः प्रश्नयोः ***कस्यचिदेकस्योत्तरं*** प्रदेयम् — 10×1 = 10

(क) कः आसीत् विहारभद्रः ? अनन्तवर्माणं प्रति विहारभद्रस्य कटूपदेशानाम् आलोचना करणीया।

(ख) भवतां पाठ्यमवलम्ब्य 'दण्डिनः पदलालित्यमि'ति विद्वद्वचनतात्पर्यं वैशद्येन विवृणुत।

4. यथेच्छं ***पञ्चप्रश्नाः*** संस्कृतभाषया देवनागरलिप्या च समाधेयाः । 2×5 = 10

(क) 'विश्रुतचरितम्' इति ग्रन्थस्य रचयिता कः ?

(ख) राजविद्याः कतिविधाः ? काश्च ताः ?

(ग) विश्रुतेन कुत्र अष्टवर्षदेशीयबालकः दृष्टः ?

(घ) कतिसंख्याकैः कैश्च फलैः बालकस्य प्राणरक्षा अभवत् ?

(ङ) कः वसुरक्षितः ? सः कमुपदिष्टवान् ?

(च) बुद्धिहीनो राजा केनाभिभूतो भूत्वा आत्मानं न जानाति ?

(छ) के तावत् षड्गुणाः ?

DINABANDHU MAHAVIDYALAYA
Estd.-1947
CENTRAL LIBRARY

5. अधोलिखितेषु विषयेषु ***यथेच्छमेकमाश्रित्य*** संस्कृतभाषया देवनागरलिप्या च टीकां लिखत — 5×1 = 5

(i) पञ्चतन्त्रम् (ii) वेतालपञ्चविंशतिः (iii) पुरुषपरीक्षा ।

——×——